देशभेदजाश्वलक्ष्म “अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्व्वशः। उत्तमानां च मध्यानां हीनानां चैव संमतान्। उत्तमास्त्वधिकाः प्रोक्तास्तथापारसिकाश्च ये। कोङ्कणाश्चैव ये वाह्या पृष्ठजा ये च कीर्त्तिताः। उशीजाताश्च कीराश्च तुरुष्का माण्डवाश्च ये। पार्व्वताः सैन्धवा मध्यास्तथा सारस्वता हयाः। संभलाश्चाष्टलाश्चैव जटादेशोद्भवाश्च ये। अधमाष्टङ्कणैः सार्द्धं ये च प्राग्दक्षिणोद्भवाः। वृत्तदीर्घाञ्चितग्रीवा ह्रस्वकर्णा महाहयाः। महाकाया महोरस्का निश्वासास्तेऽधिका मताः। अत्यन्तं विनतं येषां निम्नांसं च मुखं भवेत्। पीनेन कटिदेशेन कुखराश्च भवन्ति ते। अध्वन्याश्च महासाराः संग्रामे चैव पूजिताः। अपि शस्त्रहताङ्गश्च नैव मुञ्चति सादिनम्। पारसीकोऽधिकस्तस्मात् कोङ्कणाः किञ्चिदूनकाः। स्थूलाः स्थूलशरीराश्च प्रस्थाने दीर्घपृष्ठकाः। कोङ्कणदेशजातानां मध्यमानां च वाजिनाम्। नाधिकैः सदृशं वक्तुं बाहुल्येन विनिर्दिशेत्। हृष्टदेहतीक्ष्णश्च स्वप्रमाणेन मध्यमः। उरुजातः समुद्दिष्टः किञ्चित्स्थूलो मनाग्जवः। अतिस्थूलोऽतितीक्ष्णश्च ह्रस्वग्रीवोरुकस्तथा। तुरुष्कः कीर्त्तितो वाजी स्थूलवक्रमुखश्च यः। कोङ्कणाकारदेहस्तु भवेन्माण्डविको हयः। शान्त्या चैव प्रमाणेन केवलं नैव तत्समः। सिन्धुदेशोद्भवो वाजी पृष्ठजश्चारुकोरुकः। आननं चापि दीर्घं च तस्य पृष्ठं प्रकीर्त्तितम्। शान्त्या चैव जवेनापि रणशूरस्त्वयं मतः। सादिभक्त्येच्छया याति ताजिकादधिकस्तथा। परिमण्डलदेहास्तु तीक्ष्णकर्णमुखा हयाः। पृष्ठदेशोद्भवा दृष्टास्तथा सारस्वताश्च ये। लम्बकर्णो जटश्चैव आष्टलः परिकीर्त्तितः। सम्भलः श्लिष्टजानुश्च पदा पश्चाद्बलोपमः। वर्त्तुलाश्चापि ह्रस्वाश्च टङ्कणाः परिकीर्त्तिताः। दाक्षिणात्यो भवेत्कुण्ठो योऽधन्यः सर्ववाजिनाम्। जवहीना महादुष्टा पूर्व्वदेशसमुद्भवाः। वाजिवद्देशजानां च वेशं विद्याद्विचक्षणः”।

अथाश्वानां विप्रादिजातिः “साम्येन जायते जातिर्ज्जातिरूपेण वाहयेत्। साम प्रदानं दण्डं च त्रिविधं विनियोजयेत्। त्रासी लुब्धोदयालुश्च विप्रः स परिकीर्त्तितः। शूरश्च दृढमन्युश्च क्षत्रियस्तुरगः स्मृतः। पापिनः कलरूपाश्च दुष्टाः वैश्याः प्रकीर्त्तिताः। विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः। ब्राह्मणान् शक्तिदानेन साम्ना चैव तु क्षत्रियान्। वैश्यान् दण्डेन शब्देन शूद्रान् दण्डेन वाहयेत्”।

अथ भद्रजात्यादि हेमा०प०ख०। “युद्धेऽध्वनि तथाग्नौ च समः पीड़ां नियच्छति। योवा व्रजति शीघ्रं च येन केनचिदासितः। धृतिं गच्छति सर्वत्र भद्रजातिस्तुरङ्गमः। मङ्गल्यो लक्षणैर्युक्तः किञ्चित्त्वेव विगर्हितः। शीघ्रं गृह्णाति शिक्षां च क्षिप्रं च प्रतिमुञ्चति १। रात्रौ स्वपिति न तथाङ्गप्रविष्टस्तुरङ्गमः। तुरङ्गमाणां क्रोधीव कामी चेर्षालुरेव च। आदौ शूरस्ततः पश्चाद्भीतत्वमुपगच्छति। न केनापि प्रकारेण चिरं पालयते तु यः। एवंविधस्तु विज्ञेयो मन्दजातिस्तुरङ्गमः २। ईर्ष्यी भीतस्तथा त्रासी तथा सर्वत्र शङ्कितः। प्रसार्य्य गात्रं सकलं दिवा वा यदि वा निशि। सततं जातनिद्रोऽन्यान् वाधते च तुरङ्गमान्। न च वेत्ति प्रकारांश्च ग्लानिं शीघ्रं च गच्छति। न च तुष्टिं समाप्नोति मृगजातिस्तुरङ्गमः ३। मिश्रैर्गुणैः स्यान्मिश्राख्यस्तथैव बड़वा गुणैः ४। भद्रः श्रेष्ठो हयोज्ञेयो जातिरेषा तु वाजिनाम्। मिश्रोमिश्राधिकोज्ञेयोगुणदोषैः समासतः”। वर्णभेदेन अन्या अपि संज्ञाः शालिहोत्रे दर्शिता विस्तरभयान्नोक्तास्तत एवावसेयाः।

बृहत्संहितायां लक्षणादि समासेनोक्तम् “दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वकर्णौष्ठपुच्छः। जङ्घाजानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो वाजी सर्वाङ्गशुद्धो भवति नरपतेः शत्रुनाशाय नित्यम्। अश्रुपातहनुगण्डहृद्गलप्रोथशङ्खकटिवस्तिजानुनि। मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः। ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरि स्थिताः। ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः। तेषां प्रपाण एको ललाटकेशेषु च ध्रुवावर्त्तः। रन्ध्रोपरन्ध्रमूर्द्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ। षड्भिर्दन्तैः सिताभैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्यब्दपञ्चाब्दिकोऽश्वः। सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिका पीतशुक्लाः काचा माक्षीकशङ्खा-अथ चलनमतो दन्तपातं च विद्धि”। अश्नाति सर्वम् अश—क्वन्। २अग्निविशेषे। अश्नुते व्याप्नोति। ४व्यापके त्रि० अश्वपर्णशब्दे उदाहरणम्। “विष्णोरश्वस्य वाजिनम्” ता०ब्रा०। ५यदुवंश्यचित्रकस्य पुत्रभेदे अश्वबाहुशब्दे विवृतिः। गोत्रापत्ये अश्वा० फञ्। आश्वायनः तद्गोत्रापत्ये पुंस्त्री०। चतुरर्थ्यां कुमुदा० ठक्। आश्विकः वाजिसन्निकृष्टदेशादौ त्रि०। अश्वेन